वज्रसारमयैः प्रकृष्टैर्नियस्रकनकप्रभैः ।
सुतीक्ष्णैर्दुरकाग्रैरुल्लिखन्तमिवावनिम् ॥
जाम्बूनदेन दाम्ना च सर्व्वतः समलङ्कृतम् ।
सुवक्त्राखुरनासञ्च सुकर्णं सुकटीतटम् ॥
सुपार्श्वं विपुलस्कन्धं सुरूपं चारुदर्शनम् ।
ककुदं तस्य चाभाति स्कन्धमापूर्य्य धिष्ठितम्" ॥)
पर्व्वताग्रभागः । इति अमरटीकायां स्वामी ॥
ककुद्मान् [त्] पुं, (ककुदस्यास्तीति । मतुप् इति "मादुपधायाश्च मतो र्वो यवादिभ्यः" । ८।२।९ । न मस्य वकारत्वम् ।) वृषः । इति हेमचन्द्रः ॥ (यथा, कुमारे । १ । ५६ ।
"तुषारसंघातशिलाः खुराग्रैः
समुल्लिखन् दर्पकलः ककुद्मान्" ॥)
पर्व्वतः । इत्यमरटीकायां स्वामी ॥
(यथा, विष्णुपुराणे २ । ४ । २७ ।
"ककुद्मान् पर्व्वतवरः सरिन्नामानि मे शृणु" ॥)
ऋषभौषधम् । इति राजनिर्घण्टः ॥ अत्र क्वचिदपवादविषयेऽप्युत्सर्गोऽभिनिविशते इति न्यायात् वतुप्राप्तौ मतुप्प्रत्ययः ॥ इति मुग्धबोधमतम् ॥ (ऊर्म्मिः । यथा, यजुर्व्वेदे । ९ । ६ ।
"ऊर्म्मिः प्रतूर्त्तिः ककुद्मान्" ॥)
ककुद्मती, स्त्री, (ककुदिव वृषस्कन्धवत् अतिशयितो मांसपिण्डः अस्त्यस्याम् । मतुप् । यवादित्वात् न मस्य वत्वं स्त्रियां ङीप् ।) कटिः । इत्यमरः ॥ २।६ । ७४ । पाछा इति भाषा ॥
ककुन्दरं, क्ली, (कस्य शरीरस्य कुं भूमिं नितम्बस्थलविशेषं दृणातीति । कु + दॄ + खच् मुम् च ।) कुकुन्दरम् । नितम्बस्थकूपकद्वयम् । इत्यमरटीकायां रमानाथः राजनिर्घण्टश्च ॥ (यथाह, याज्ञवल्क्यः । ३ । ९६ ।
"कनीनिके चाक्षिकूटे शष्कुलीकर्णपत्रकौ ।
कर्णौ शङ्खौ भ्रुवौ दन्तवेष्टावोष्ठौ ककुन्दरे" ॥
"सक्तविभक्तचतुरस्रः ककुन्दरविभागशोभी रथाङ्गाकारसंस्थितश्च नितम्बभागः" ।
इति दशकुमारे ॥)
ककुप्, [भ्] स्त्री, (कं वातं स्कुभ्नाति विस्तारयति या । स्कुभ इति सौत्रः । क्विप् । पृषोदरादित्वात् सलोपः ।) दिक् । इत्यमरः ॥ १ । ३ । १ ॥ प्रवेणी । शोभा । चम्पकमाला । इति मेदिनी ॥ शास्त्रम् । इति विश्वः ॥
ककुभ्, स्त्री, (कं सुखं आनन्दं स्कुभ्नाति विस्तारयति या पृषोदरादित्वात् सलोपः ।) रागिणीविशेषः । तस्या नामान्तरम् । कुञ्जः । तस्या लक्षणम् ।
"पीतं वसाना वसनं सुकेशी
वने रुदन्ती पिकनाददूना ।
विलोकयन्ती ककुभोऽतिभीता
मूर्त्तिः प्रदिष्टा ककुभस्तथेयम्" ॥
इति सङ्गीतदामोदरः ॥ (दिक् । यथा, भागवते । २ । ७ । २५ ।
"वक्षःस्थलस्पर्शरुग्नमहेन्द्रवाहदन्तैर्विड़म्बितककुब्जुष ऊढ़हासम्" ॥ दक्षकन्या । सैव धर्म्मपत्नी । यथा तत्रैव । ६ । ६ । ४ ।
"भानुर्लम्बा ककुब् जामिर्विश्वा साध्या मरुत्वती" ॥)
ककुभः, पुं, (कस्य वातस्य कुः भूमिः स्थानं प्रकाशरूपविशेष इति यावत् भात्यस्मात् । ककु + भा + कः । यद्वा कं वातं स्कुभ्नाति विस्तारयति । क + स्कुभ + कः + पृषोदरादित्वात् सलोपः ।) अर्ज्जुनवृक्षः । (यथा, चक्रपाणिदत्तकृतसंग्रहे ॥
"गोधूमककुभचूर्णं छागपयोगव्यसर्पिषा पक्वम् ।
मधुशर्करासमेतं शमयति हृद्रोगमुद्धतं पुंसाम् ॥
मूलं नागबलायास्तु चूर्णं दुग्धेन पाययेत् ।
हृद्रोगश्वासकासघ्नं ककुभस्य च वल्कलम् ॥
रसायनं परं बल्यं वातजिन्मासयोजितम् ।
संवत्सरप्रयोगेन जीवेत् वर्षशतं नरः" ॥)
वीणाङ्गम् । तत्पर्य्यायः । प्रसेवकः २ । इत्यमरः ॥ १ । ७ । ७ ॥ वीणाप्रान्तवक्रकाष्ठम् । दण्डाधःशब्दगाम्भीर्य्यार्थं दारुमयं भाण्डं यच्चर्म्मणाच्छाद्य दीयते तदित्यन्ये । वीणास्थितालाबुफले इत्यपरे । इति भरतः ॥ रागविशेषः । इति मेदिनी ॥ (शिवः । यथा महाभारते १३ । शिवसहस्रनामकीर्त्तने १७ । १३० ।
"हर्य्यक्षः ककुभो वज्री शतजिह्वः सहस्रपात्" ॥)
ककुभा, स्त्री, (केन आदित्येन कुत्सितानि भानिनक्षत्राण्यस्याम् । टावन्तोऽपीति कश्चित् तन्न । अधिकरणबहुव्रीहिप्रसङ्गात् ।) दिक् । इत्यमरटीकायां रायमुकुटः ॥ (केन सूर्य्येण दिनप्रकाशेनेति भावः कुत्सिता भाति । भा दीप्तौ । इति धातोः सुपीति कः । भिदादिङ् वा । रात्रावेवास्या माधुर्य्यस्याधिक्यमिति तात्पर्य्यार्थः ।) रागिणीविशेषः । इति हलायुधः ॥
ककुभादनी, स्त्री, (ककुभः अर्ज्जुन इव अद्यतेऽसौ तुल्यगुणत्वात् । ककुभ + अद् + कर्म्मणि ल्युट् + स्त्रियां ङीप् ।) नलीनामगन्धद्रव्यम् । इति शब्दचन्द्रिका ॥
कक्क हासे । इति कविकल्पद्रुमः ॥ (भ्वां-परं-अकं-सेट् ।) कोपधः । कक्कति । इति दुर्गादासः ॥
कक्कोलः, पुं स्त्री, (ककते गच्छति दिशि प्रकाशते इत्यर्थः ततः क्विप् कक्कोलति संस्त्यायति कुलधातोर्ज्वलादित्वात् णः । कक् चासौ कोलश्चेति ।
"पूगकक्कोलकर्पूरलवङ्गसुमनःफलैरिवृत्तैः" ।)
सुगन्धिद्रव्यविशेषः । काँकला इति भाषा । अस्य गुणाः । कटुत्वम् । हृद्यत्वम् । सुगन्धित्वम् । कफवातनाशित्वञ्च । इति राजवल्लभः ॥ (यथा रामायणे ३ काण्डे ।
"वनानि च सुरम्याणि कक्कोलानां लवङ्गस्य च" ॥)
कक्कोलकं, क्ली, (कक्कोलस्य + इदमर्थे स्वार्थे वा कन् । शाल्मलिद्वीपान्तर्गतसप्तमवर्षपर्व्वतः । तद्विवरणं विष्णुपुराणे २ अंशे ४ अध्याये द्रष्टव्यम्" ।) गन्धद्रव्यविशेषः । काँकला इति ख्यातम् । तत्पर्य्यायः कोलकम् २ कोषफलम् ३ । इत्यमरः ॥ वृत्तफलम् ४ कटुकफलम् ५ देय्यम् ६ स्थूलमरिचम् ७ कक्कोलम् ८ माधवोचितम् ९ कालम् १० कटफलम् ११ मरिचम् १२ । अस्य गुणाः । कटुत्वम् । तिक्तत्वम् । उष्णत्वम् । वक्त्रजाड्यहरत्वम् । दीपनत्वम् । पाचनत्वम् । रुचिकारित्वम् ।
कफवातरोगनाशित्वञ्च । इति राजनिर्घण्टः ॥
("कक्कोलकं लवङ्गञ्च तिक्तं कटुकफापहम् ।
लघुतृष्णापहं वक्त्रक्लेददौर्गन्ध्यनाशनम्" ॥
इति सुश्रुतः ॥)
कक्ख हासे । इति कविकल्पद्रुमः ॥ (भ्वां-परं-अकं-सेट् ।) कोपधः । कक्खति । इति दुर्गादासः ॥
कक्खटः, त्रि, (कक्खति हसति यः ॥ प्रफुल्लमुखो जनः । इति व्युत्पत्त्यर्थः । अन्यस्तु रूढ्यर्थः । कक्ख अटन् । अथवा कक्खं प्रसन्नभावं अटति अद्यति कर्म्मण्यन्तर्भावितत्वात् कक्ख + अट् + अच् । यदा कठिणां वर्त्तते तदा कक्खति छाया प्रकाशयति वर्णान् । अन्तर्णिजर्थः ।) कठिनः । इत्यमरः ॥
कक्खटपत्रकः, पुं, (कक्खटानि प्रकाशान्वितानि पत्राणि यस्य । कप् ।) वृक्षविशेषः । पाट इति भाषा । तत्पर्य्यायः । पट्टः २ वाजशलः ३ शाणिः ४ चिमः ५ । इति शब्दमाला ॥
कक्खटी, स्त्री, (कक्खति भूकर्षणेन प्रकाशयति वर्णान् । अन्राप्यन्तर्णिच् शकादिभ्योऽटन् गौरादित्वात् ङीष् ।) खटिका । खड़ी इति भाषा । तत्पर्य्यायः । वर्णलेखा २ कठिनी ३ खटी ४ । इति त्रिकाण्डशेषः ॥
कक्षः, पुं, (कषतीति । कष् हिंसायां "वृतृवदिहनिकमिकषिभ्यः सः" । उणां ३ । ६२ । इति सः ।) बाहुमूलम् । इत्यमरः । २ । ६ । ७९ ॥ काँक् वगल् इति च भाषा ॥
(यथा, महाभारते ४ । ६ । १ ।
"वैदर्य्यरूपान् प्रतिमुच्य काञ्चनानक्षान् स कक्षे परिरभ्य वाससा" ॥)
तृणम् । वीरुत् । इत्यमरः ॥ ३ । ३ । २१८ ।
(यथा, मनुः ७ । ११० ।
"यथोद्धरति निर्द्दाता कक्षं धान्यञ्च रक्षति" ॥
"यथा क्षेत्रे धान्यतृणादिकयोः सहोत्पन्नयोरपि धान्यानि लवनकर्त्ता रक्षति तृणादिकञ्चोद्धरति" ।
इति तट्टीकायां कुल्लूकभट्टः ॥) शुष्कतृणम् । इति धरणी ॥ (यथा, माघः । २ । ४२ ।
"प्रद्दीप्योदर्चिषं कक्षे शेरते तेऽभिमारुतम्" ॥)
कच्छः । (यथा महाभारते ।१। वारणावतगमने । १४६ । २२ ॥
"कक्षघ्नः शिशिरघ्नश्च महाकक्षे बिलौकसः ।
न दहेदिति चात्मानं यो रक्षति स जीवति" ॥
बिलौकसो महाकक्षे वृहत्कच्छे इत्यर्थः ॥) शुष्कवनम् । पापम् । इति हेमचन्द्रः ॥ अरण्यम् । इति रुद्रः ॥ (यथा महाभारते १ । खाण्डवदहनपर्व्वणि । २२१ । ३ ।
"अयमग्निर्दहन् कक्षमित आयाति भीषणः" ॥)
भित्तिः । पार्श्वः । इति भरतधृतजयः ॥
(यथा, रामायणे । ५ । ५ । २५ ।
"तस्य वानरसिंहस्य क्रममाणस्य सागरम् ।
कक्षान्तरगतो वायुर्जीमूत इव गर्ज्जति" ॥)
कक्षरुहा, स्त्री, (कक्षे कच्छे जलप्राये रोहति इति । कक्ष + रुह + क । अस्या अनूपजातत्वात् तथात्वम् ।) नागरमुस्ता । इति राजनिर्घण्टः ॥